# राजकीय माध्यमिक विद्यालय ...................................

माध्यमिक परीक्षा 2017

तृतीय भाषा–संस्कृतम्

अधिकतमांकः 80 समय – 3 घंटे 15 मिनिट(सपाद होरात्रयम्)

परीक्षार्थिभ्यः सामान्य निर्देशा

1. परीक्षार्थिभिः सर्वप्रथमं स्व प्रश्न पत्रोपरि नामांकः अनिवार्यतः लेखयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुक्तराण्युत्तर पुस्तिकायामेव लेखनीयानि।

4. एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।

**प्रश्न 1. अधोलिखित गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथा–निर्देशं लिखत–** 4

ध्येयं प्रति कटिबद्धता पतनात् रक्षति। अस्माकं जीवनं उन्नतं भवति। जीवने लोकोपकारकं लक्ष्यं स्वीकुर्मः। कालं निष्प्रयोजनम् व्यतीतं न कुर्मः, तदा एव महत् कार्य साधयितुं शक्नुमः। यदा वयं सत्कर्मसु तत्पराः भवामः, अधिकं परिश्रमं कुर्मः तदा अस्माकं शक्तिः वर्धते। शक्तिवर्धकाः भाषा विलसन्ति, विनाश कारकाः भाषाः नश्यन्ति। जीवनं कमलवत् सुगन्धितं भवति।

प्र. 1. एक पदेन उत्तरत

1. जीवनं कथं सुगन्धितं भवति ? ½
2. जीवने वयं की दृशं लक्ष्य स्वीकुर्मः ? ½

प्र 2. पूर्णवाक्येन उत्तरत

अस्मांक शक्तिः कदा वर्धते ? 1

प्र 3. निर्देशानुसारम् उत्तरत–

I. 'कालं निष्प्रयोजनं' इति अनयोः किं विशेषण्? ½

II. 'अस्माकं जीवनं उन्नतं भवति' वाक्येऽस्मिन् कर्त्ता कः? ½

III. 'दृढता? इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्? ½

IV. 'अधिक परिश्रमम्' इत्यनयोः किं विशेष्यपदम्? ½

**प्रश्न 2. अद्योलिखित गद्यांशं प्रपठ्य एतदाधारित प्रश्नानामुत्तराणि यथा निर्देशं लिख्यताम्–** 8

आतंकवादः आधुनिक विश्वस्य गुरूतमा समस्या अस्ति। संसारस्य प्रत्येकं देशः आतंकवादेन येन केन प्रकारेण पीडितः अस्ति। आतंकवादः विनाशस्य सा लीला या विश्वं ग्रसितं तत्परा अस्ति। आतंकवादेन विश्वस्य अनेकानि क्षेत्राणि रक्तविलिप्तानि सन्ति। अनेके अनेके निर्दोषाः जनाः प्राणान् अत्यजन्। महिलाः विधवाः जाताः बालाश्च अनाथाः अभवन्। सर्वशक्तिमान् अमेरिकादेशोऽपि अनेन सन्तप्तः अस्ति। भारत देशः तु आतंकवादेन अनेकैः वर्षैः पीडितः वर्तते। आतंकवादे तु ते एव जनाः सम्मिलिताः सन्ति, ये स्वार्थपूर्तिं कर्तुम् इच्छन्ति, संसारे च अशान्तेः वातावरणम् द्रष्टुम् कामयन्ते। शान्तीच्छुकैः समाधेयाः, अन्यथा एषा समस्या सुरसामुखम् इव प्रतिदिनं वृद्धिं यास्यति।

(क) एकपदेन उत्तरत–

1. आधुनिक विश्वस्य गुरूतमा समस्या का ? ½
2. आतंकवादस्य प्रमुखं कारणं किम् उक्तम् ? ½
3. आतंकवादः किमिव प्रतिदिनं वृद्धिं यास्यति? ½
4. अनुच्छेदे कः देशः सर्वशक्तिमान् इत्युक्तः? ½

(ख) पूर्णवाक्येन उत्तरत–

1. आतंकवादः कीदृशी लीला अस्ति? 1
2. शान्तीच्छुकैः देशैः आतंकवादस्य समस्यासमाधातुं किं कर्तव्यम् ? 1
3. आतंकवादे के जनाः सम्मिलिताः सन्ति ? 1

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत ? 1

(घ) यथा निर्देशं प्रश्नान् उत्तरत–

1. 'विश्वस्य गुरूतमा समस्या अस्ति' अत्र "गुरूतमा" कस्य विशेषणम् ? ½
2. 'अनेनकानि क्षेत्राणि' इत्यनयोः पदयोः विशेषण पदं चिनतु ? ½
3. 'अनेन सन्तप्तः अस्ति' अत्र 'अनेन' सर्वनाम पदं कस्मै प्रयुक्तम् ? ½
4. 'ये स्वार्थपूर्तिं कर्तुम् इच्छन्ति' वाक्ये 'इच्छन्ति' क्रियापदस्य कर्तृपदं किम्? ½

प्रश्न 3. भवान् रमेशः जयपुर नगरे निवसति। स्वमित्रं विजयं प्रति संस्कृते एव पत्रं लिखत, यस्मिन् भवतः दिनचर्यायाः वर्णनं स्यात्। 4

अथवा

स्वस्य जन्म दिवसे आमन्त्रणाय मित्रं प्रति अधोलिखितमपूर्ण पत्रं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तर पुस्तिकायां लिखत।

मन्जूषा

(आगन्तव्यम्, दिनांके, मित्र, अवसरे, उदयपुरतः, हर्षस्य, निधिः, जन्म दिवसः, उत्साहवर्धनं, कुशलं)

...............................
तिथि – 18.11.14

प्रिय मित्र......।

सप्रेम नमस्कारः।

अत्र .......... तत्रापि कामये। अपरं चायम् अतीव............विषयः यत् प्रतिवर्षम् इव अस्मिन्नपि वर्षे मम .............. नवम्बर मासस्ये सप्तमे................. मन्यते। अस्मिन्......भवत्या अपि अवश्यमेव..............। तवागमनेन मम ..... भविष्यति।

भवतः मित्रम

....... ..............

.

प्रश्न 4. मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं "वैध–रोगी" तयोमध्ये संवादपूरयत– ½ **x** **8=4** अंक

(दादामि, बुभुक्षा, मातुलस्य, मंजूषा, उदरवेदना, चिन्ता, आरभ्य, गतवान् नास्ति।)

रोगी – महाभाग ! महती (1) ...........अस्ति। किमपि औषधं ददातु।

वैधः – उद्वेगः मास्तु। कदा (2) ..........उदरवेदना?

रोगी – ह्यः आरभ्य उदरवेदना, मुखे रूचि एव (3) ..........।

वैधः – ह्यः कुत्र (4) .........किं किं खादितवान्?

रोग – परह्यः (5) ...........गृहं गतवान। तत्र मातुलानी मधुरं कृतवती। अहं यथेष्टं खादितवान्।

वैद्यः – (6)............. मास्तु, अहम् औषधं ददामि।

रोगी – किञ्चित शिरोवेना अपि अस्ति । (7) ....... एव नास्ति। मुखे रूचिः अपि नास्ति।

वैघः – भवतः अजीर्णं जातम्। श्वः परश्वः आगच्छतु।

रोगी – आहारं किं स्वीकरोमि।

वैद्य – धनाहारम् अधिकं न.....................(8), द्रवाहारं स्वीकरोतु।

प्र.5 अधः चित्रम् दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया प्रदूषित नदी विषये अष्टवाक्यानि संस्कृत भाषायां लिखत–

**½ x 8=4** अंक

मंजूषा

(क्षालयन्ति, नदी, मलिनं, तिस्त्रः, विषाक्तानि, प्रदूषिता, विलीयन्ते, जलम्, अवकरम्, वस्त्राणि, क्षिपति, अस्माभिः।)

अथवा

अधोलिखिताम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा उत्तर पुस्तिकायाम् लिखत।

मञ्जूषाः

(सत्पुरूषाः, कर्मणा, दुःखं, परस्य, ह्यं, प्रतिष्ठा, तन्नाशाम, परोपकारः परेषाम् प्रतिनामुपकारः परोपकारोऽस्ति।)

(1) ..... हित सम्पादनं मनसा वाचा (2)........चान्येषां हितानुष्ठानमेव परोपकार शब्देन गृह्यते। संसारे (3) ..........एव स गुणो विद्यते, येन मनुष्येषु सुखस्य (4) ....................वर्तते। परोपकारेण (5) पवित्रं सरलं सरसं सदयं च भवति। (6).................... कदापि न स्वार्थतत्पराः भवन्ति। ते परेषां (7)..........स्वस्य दुःखं मत्वा (8) ........यतन्ते।

**प्र. 6 द्वौ श्लौकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम्।** **4 अंक**

**प्रश्न 7. अधोलिखित पदेषु सन्धिविच्छेदं कृत्वा सन्धिनामपि उत्तर पुस्तिकायां लिखत–**

(क) जगदीशः 1 अंक

(ख) गायकः 1 अंक

(ग) नीरस 1 अंक

**प्रश्न 8. अधोलिखित समस्त पदानां विग्रहं अथवा विग्रह पदानां समासं कृत्वा समासस्य नमाऽपि लिखत–**

(i) कज्जलमलिनं धूमं मुञ्चति। 1 अंक

(ii) जीवनमरणं नो कामये। 1 अंक

(iii) पीतं अम्बरं धारयति। 1 अंक

**प्रश्न 9. कोष्ठकेषु प्रदतैः शब्दैः प्रकृति प्रत्ययानुसारं रिक्त स्थान पूर्तिः करणीया –**

(क) मानव सेवां............(कृ + शानच्) वृक्षाः केषां न हितकराः। 1 अंक

(ख) छात्रैः अनुशासनम् .............(पाल् + अनीयर्) 1 अंक

(ग) .............( सुख + अर्थ + इन् ) कुतो विद्या। 1 अंक

(ध) पुस्तकानां............(महत् + तल्) कः न जानाति। 1 अंक

**प्रश्न 10. मञ्जूषायां प्रदतैः अव्यय पदैः रिक्त स्थानानि पूरयित्वा उत्तर पुस्तिकायां लिखत–**

**(वृथा, कदापि, यत्र–तत्र, नूनं, अधुना)** **4 अंक**

ते जनाः नूनं धन्याः, ये (i) .........निरूत्साहिताः न भवन्ति। तै सदैव धन्याः ये (ii)............वदन्ति। ते (iii) ...........गच्छन्ति तत्र–तत्र सफलाः भवन्ति। यत् कार्यं तु (iv)............एव करणीयं श्वः न।

**प्रश्न 11. अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तर–पुस्तिकायां लिखत–** **4 अंक**

(क) जनाः कथां श्रृण्वन्ति।

(ख) त्वं ग्रन्थं पठसि।

(ग) रामेण रावणः हन्यते।

(घ) पुत्रेण पिता सेव्यते।

**प्रश्न 12. घटिका चित्रं सहायतया अंकानां स्थाने संस्कृत शब्देषु समय लेखनं करणीयम्–**

(क) सः प्रातः.............................उत्तिष्ठति । 1 अंक

(ख) सः प्रातः...........................वादने व्यायामं करोति। 1 अंक

(ग) सः.....................................वादने विद्यालयं गच्छति।	1 अंक

**प्रश्न 13. अधोलिखित संख्यायाः स्वरचित वाक्ये प्रयोगः करणीय**

(क) त्रयाशीतिः संख्यां अंके लिखत।	1 अंक

(ख) 55 संख्या शब्देषु लिखत।	1 अंक

**प्रश्न 14. अधोलिखित वाक्ये शुद्धे कृत्वा पुनः लेखनीये–**

(क) बालकाः विद्यालयं गच्छति।	½ अंक

(ख) आवाम् पुस्तकं पठतः।	½ अंक

**प्रश्न 15. अधोलिखित गद्याशं पठित्वा प्रश्नान् उत्तरत–**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यक कार्येण तस्या भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रतिचलिता। मार्गे गहन–कानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमारी गच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद्–कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरूथः? अयमेकस्ताद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चित् लक्ष्यते।

(क) एक पदेन उत्तरत–

(i) राजसिंहः कुत्र वसति स्म ?	½ अंक

(ii) राजसिंहस्य भार्या का आसीत् ?	½ अंक

(ख) पूर्ण वाक्येन उत्तर–

(i) बुद्धिमती कं प्रति चलिता ?	1

(ii) 'तस्य भार्या'– अत्र 'तस्य' इति सर्वनाम पदस्थाने संज्ञापदं किम् ?	1

(iii) 'एकं व्याघ्रम'– इत्यनयोः पदयोः विशेषणपदं किम् ?	1

(iv) 'पत्नी' इत्यस्य पर्यायवाचि पदं गद्यांशात् चित्वा लिखत?	1

**प्रश्न 16. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत :–**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो। बली बलं वेत्ति न वेत्ति निर्बलः।।
पिको वसन्तस्य गुणं न वायसः। करी च सिंहस्य बलं न मूषकः।।

(क) एक–पदेन उत्तरत–

(i) कः गुणं वेत्ति ?	½ अंक

(ii) वसन्तस्य गुणं को वेत्ति ?	½ अंक

(ख) बलं कः वेत्ति कश्च न वेत्ति ? (पूर्णवाक्येन उत्तरत)	1 अंक

(ग) निर्गुणः इति कर्तृपदस्य कियापदं किम् ?	1 अंक

(घ) 'बली' इति पदस्य विलोमपदं किम् ?	1 अंक

(ङ) 'काकः' इत्यस्य पर्यायपदं पद्यांशात् चित्वा लिखित।	1 अंक

**प्रश्न 17. अधोलिखित नाट्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथा निर्देशं लिखत–**

चाणक्यः–वत्स मणिकार श्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।
शिष्यः– तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्। (उभौ परिक्रामतः)
शिष्यः– (उपसृत्य) उपाध्याय ! अयं श्रेष्ठी चन्दनदासः।
चन्दनदासः– जयत्वार्यः।
चाणक्यः– श्रेष्ठिन् ! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभा ?
चन्दनदासः– (आत्मगतम्) अत्यादरः शंकनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता में वाणिज्या।
चाणक्यः– भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।
चन्दनदासः– आज्ञापयतु आर्यः, किं कियत् च अस्मज्जना– दिष्यते इति।

(क) एक पदेन उत्तरत–

(i) कः चन्दनदासं द्रष्टुमिच्छति ?	½ अंक

(ii) अत्यादरः कीदृशः?	½ अंक

(ख) प्रीताभ्यः प्रकृतिभ्यः राजानः किम् इच्छन्ति ? 1 अंक
(ग) प्रीताभ्यः प्रकृतिभ्यः–इत्यनयोः पदयोः विशेषणं पदं किम् ? 1 अंक
(घ उपर्युक्त नाट्यांशात् 'स्वगतम्' इति पदस्य पर्यायपदं चित्वा लिखत ? 1 अंक
(ङ) 'जयत्वार्यः' अत्र क्रिया पदं किम् ? 1 अंक

**प्रश्न 18. "उदये सविता रक्तो रक्तश्चास्तमये तथा" इत्यस्य भाव बोधनं सरल संस्कृत भाषायां लिखत– 2 अंक**

**प्रश्न 19 अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्। ½ x 4=2 अंक**
अयोग्यः पुरूषः नास्ति, योजकस्तत्र दुर्लभः।।
उपर्युक्त श्लोकस्यान्वयमाश्रित्य रिक्त स्थानानि पूरयत।

अमन्त्रम् (i) .........नास्ति (ii)............मूलं नास्ति। अयोग्यः पुरूषः (iii) ...........तत्र (iv)............दुर्लभः।।

**प्रश्न 20. दत्तोत्तराण्यधिकृत्य प्रश्न निर्माण करणीयम्–**
(क) प्रश्नः–...................................................? 1
उत्तरम्- <u>आत्महितैषिभिः</u> सर्वदा व्यायामः कर्त्तव्यः।
(ख) प्रश्नः–...............................................? 1
उत्तरम.- राजा <u>मुनिं</u> प्रश्नत्रयम पृच्छत्।
(ग) प्रश्नः–:........................................?
उत्तरम्- चातकः <u>वने </u>वसति।

**प्रश्न 21. अधोलिखितानि वाक्यानि क्रमरहितानि। यथाक्रमं संयोजनं कृत्वा लिखत– ½ x6 =3 अंक**

1. तत्क्षणमेव रक्षापुरूषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।
2. कश्चन निर्धनोः जनः भूरि परिश्रम्य किंचिद् वित्तमुपार्जितवान्।
3. न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।
4. तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः।
5. तस्यामेव रात्रौ तस्मिन् गृहे काश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।
6. पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्।

**प्रश्न 22. 'क' स्तम्भे दत्तानां पदानां समानार्थक पदं 'ख' स्तम्भे दत्तम्। तौ यथोचितं योजयत– ½ x6 =3 अंक**

| क | ख |
|---|---|
| 1. कलत्रम् | वारम्वारम् |
| 2. पत्तनम् | तिन्तिणी |
| 3. अम्भसा | पत्नी |
| 4. मुहुर्मुहुः | आरोहणं कृत्वा |
| 5. चिञ्चाफलम् | नगरम् |
| 6. आरूह्य | जलेन |